श्री वराह कवचं

श्री वराह कवचं

आद्यं रंगमिति प्रोक्तं विमानं रंग संज्ञितं |
श्रीमुष्णं वेंकटाद्रिं च सालग्रामं च नैमिशं||

तोताद्रिं पुष्करं चैव नरनारायणाश्रमं |
अष्टौ मे मूर्तयः संति स्वयं व्यक्ता महीतले||

श्री सूत उवाच |
श्रीरुद्रमुख निर्णीत मुरारि गुणसत्कथा |
संतुष्टा पार्वती प्राह शंकरं लोकशंकरं ||1||

श्री पार्वती उवाच |
श्रीमुष्णेशस्य माहात्म्यं वराहस्य महात्मनः |
श्रुत्वा तृप्तिर्न मे जाता मनः कौतूहलायते |
श्रोतुं तद्देव माहात्म्यं तस्माद्वर्णय मे पुनः ||2||

श्री शंकर उवाच |
शृणु देवि प्रवक्ष्यामि श्रीमुष्णेशस्य वैभवं |
यस्य श्रवणमात्रेण महापापैः प्रमुच्यते |
सर्वेषामेव तीर्थानां तीर्थ राजोऽभिधीयते ||3||

नित्य पुष्करिणी नाम्नी श्रीमुष्णे या च वर्तते |
जाता श्रमापहा पुण्या वराह श्रमवारिणा ||4||

विष्णोरंगुष्ठ संस्पर्शात्पुण्यदा खलु जाह्नवी |
विष्णोः सर्वांगसंभूता नित्यपुष्करिणी शुभा ||5||

महानदी सहस्त्रेण नित्यदा संगता शुभा |
सकृत्स्नात्वा विमुक्ताघः सद्यो याति हरेः पदं ||6||

तस्या आग्नेय भागे तु अश्वत्थच्छाययोदके |
स्नानं कृत्वा पिप्पलस्य कृत्वा चापि प्रदक्षिणं ||7||

दृष्ट्वा श्वेतवराहं च मासमेकं नयेद्यदि |
कालमृत्युं विनिर्जित्य श्रिया परमया युतः ||8||

आधिव्याधि विनिर्मुक्तो ग्रहपीडाविवर्जितः |
भुक्त्वा भोगाननेकांश्च मोक्षमंते व्रजेत् ध्रुवं ||9||

अश्वत्थमूलेऽर्कवारे नित्य पुष्करिणी तटे |
वराहकवचं जप्त्वा शतवारं जितेंद्रियः ||10||

क्षयापस्मारकुष्ठाद्यैः महारोगैः प्रमुच्यते |
वराहकवचं यस्तु प्रत्यहं पठते यदि ||11||

शत्रु पीडाविनिर्मुक्तो भूपतित्वमवाप्नुयात् |
लिखित्वा धारयेद्यस्तु बाहुमूले गलेऽथ वा ||12||

भूतप्रेतपिशाचाद्याः यक्षगंधर्वराक्षसाः |
शत्रवो घोरकर्माणो ये चान्ये विषजंतवः |
नष्ट दर्पा विनश्यंति विद्रवंति दिशो दश ||13||

श्रीपार्वती उवाच |
तद्ब्रूहि कवचं मह्यं येन गुप्तो जगत्त्रये |
संचरेद्देववन्मर्त्यः सर्वशत्रुविभीषणः |
येनाप्नोति च साम्राज्यं तन्मे ब्रूहि सदाशिव ||14||

श्रीशंकर उवाच |
शृणु कल्याणि वक्ष्यामि वाराहकवचं शुभं |
येन गुप्तो लभेन्मर्त्यो विजयं सर्वसंपदं ||15||

अंगरक्षाकरं पुण्यं महापातकनाशनं |
सर्वरोगप्रशमनं सर्वदुर्ग्रहनाशनं ||16||

विषाभिचार कृत्यादि शत्रुपीडानिवारणं |
नोक्तं कस्यापि पूर्वं हि गोप्यात्गोप्यतरं यतः ||17||

वराहेण पुरा प्रोक्तं मह्यं च परमेष्ठिने |
युद्धेषु जयदं देवि शत्रुपीडानिवारणं ||18||

वराहकवचात् गुप्तो नाशुभं लभते नरः |
वराहकवचस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः ||19||

छंदोऽनुष्टुप् तथा देवो वराहो भूपरिग्रहः |
प्रक्षाल्य पादौ पाणी च सम्यगाचम्य वारिणा ||20||

कृत स्वांग करन्यासः सपवित्र उदंमुखः |
ॐ भूर्भवस्सुवरिति नमो भूपतयेऽपि च ||21||

नमो भगवते पश्चात्वराहाय नमस्तथा |
एवं षडंगं न्यासं च न्यसेदंगुलिषु क्रमात् ||22||

नमः श्वेतवराहाय महाकोलाय भूपते |
यज्ञांगाय शुभांगाय सर्वज्ञाय परात्मने ||23||

स्रव तुंडाय धीराय परब्रह्मस्वरूपिणे |
वक्रदंष्ट्राय नित्याय नमोऽंतैर्नामभिः क्रमात् ||24||

अंगुलीषु न्यसेद्विद्वान् करपृष्ठतलेष्वपि |
ध्यात्वा श्वेतवराहं च पश्चान्मंत्रमुदीरयेत् ||25||

ध्यानं |
ॐ श्वेतं वराहवपुषं क्षितिमुद्धरंतं
शंघारिसर्व वरदाभय युक्त बाहुं |
ध्यायेन्निजैश्च तनुभिः सकलैरुपेतं
पूर्णं विभुं सकलवांछितसिद्धयेऽजं ||26||

कवचं |
वराहः पूर्वतः पातु दक्षिणे दंडकांतकः |
हिरण्याक्षहरः पातु पश्चिमे गदया युतः ||27||

उत्तरे भूमिहृत्पातु अधस्ताद्वायुवाहनः |
ऊर्ध्वं पातु हृषीकेशो दिग्विदिक्षु गदाधरः ||28||

प्रातः पातु प्रजानाथः कल्पकृत्संगमेऽवतु |
मध्याह्ने वज्रकेशस्तु सायाह्ने सर्वपूजितः ||29||

प्रदोषे पातु पद्माक्षो रात्रौ राजीवलोचनः |
निशींद्र गर्वहा पातु पातूषः परमेश्वरः ||30||

अटव्यामग्रजः पातु गमने गरुडासनः |
स्थले पातु महातेजाः जले पात्ववनीपतिः ||31||

गृहे पातु गृहाध्यक्षः पद्मनाभः पुरोऽवतु |
झिल्लिका वरदः पातु स्वग्रामे करुणाकरः ||32||

रणाग्रे दैत्यहा पातु विषमे पातु चक्रभृत् |
रोगेषु वैद्यराजस्तु कोलो व्याधिषु रक्षतु ||33||

तापत्रयात्तपोमूर्तिः कर्मपाशाच्च विश्वकृत् |
क्लेशकालेषु सर्वेषु पातु पद्मापतिर्विभुः ||34||

हिरण्यगर्भसंस्तुत्यः पादौ पातु निरंतरं |
गुल्फौ गुणाकरः पातु जंघे पातु जनार्दनः ||35||

जानू च जयकृत्पातु पातूरू पुरुषोत्तमः |
रक्ताक्षो जघने पातु कटिं विश्वंभरोऽवतु ||36||

पार्श्वे पातु सुराध्यक्षः पातु कुक्षिं परात्परः |
नाभिं ब्रह्मपिता पातु हृदयं हृदयेश्वरः ||37||

महादंष्ट्रः स्तनौ पातु कंठं पातु विमुक्तिदः |
प्रभंजन पतिर्बाहू करौ कामपिताऽवतु ||38||

हस्तौ हंसपतिः पातु पातु सर्वांगुलीर्हरिः |
सर्वांगश्चिबुकं पातु पात्वोष्ठौ कालनेमिहा ||39||

मुखं तु मधुहा पातु दंतान् दामोदरोऽवतु |
नासिकामव्ययः पातु नेत्रे सूर्येंदुलोचनः ||40||

फालं कर्मफलाध्यक्षः पातु कर्णौ महारथः |
शेषशायी शिरः पातु केशान् पातु निरामयः ||41||

सर्वांगं पातु सर्वेशः सदा पातु सतीश्वरः |
इतीदं कवचं पुण्यं वराहस्य महात्मनः ||42||

यः पठेत् शृणुयाद्वापि तस्य मृत्युर्विनश्यति |
तं नमस्यंति भूतानि भीताः सांजलिपाणयः ||43||

राजदस्युभयं नास्ति राज्यभ्रंशो न जायते |
यन्नाम स्मरणात्भीताः भूतवेताळराक्षसाः ||44||

महारोगाश्च नश्यंति सत्यं सत्यं वदाम्यहं |
कंठे तु कवचं बद्ध्वा वंध्या पुत्रवती भवेत् ||45||

शत्रुसैन्य क्षय प्राप्तिः दुःखप्रशमनं तथा |
उत्पात दुर्निमित्तादि सूचितारिष्टनाशनं ||46||

ब्रह्मविद्याप्रबोधं च लभते नात्र संशयः |
धृत्वेदं कवचं पुण्यं मांधाता परवीरहा ||47||

जित्वा तु शांबरीं मायां दैत्येंद्रानवधीत्क्षणात् |
कवचेनावृतो भूत्वा देवेंद्रोऽपि सुरारिहा ||48||

भूम्योपदिष्टकवच धारणान्नरकोऽपि च |
सर्वावध्यो जयी भूत्वा महतीं कीर्तिमाप्तवान् ||49||

अश्वत्थमूलेऽर्कवारे नित्य पुष्करिणीतटे |
वराहकवचं जप्त्वा शतवारं पठेद्यदि ||50||

अपूर्वराज्य संप्राप्तिं नष्टस्य पुनरागमं |
लभते नात्र संदेहः सत्यमेतन्मयोदितं ||51||

जप्त्वा वराहमंत्रं तु लक्षमेकं निरंतरं |
दशांशं तर्पणं होमं पायसेन घृतेन च ||52||

कुर्वन् त्रिकालसंध्यासु कवचेनावृतो यदि |
भूमंडलाधिपत्यं च लभते नात्र संशयः ||53||

इदमुक्तं मया देवि गोपनीयं दुरात्मनां |
वराहकवचं पुण्यं संसारार्णवतारकं ||54||

महापाताककोटिघ्नं भुक्तिमुक्तिफलप्रदं |
वाच्यं पुत्राय शिष्याय सद्वृत्ताय सुधीमते ||55||

श्री सूतः –
इति पत्युर्वचः श्रुत्वा देवी संतुष्टमानसा |
विनायक गुहौ पुत्रौ प्रपेदे द्वौ सुरार्चितौ ||56||

कवचस्य प्रभावेन लोकमाता च पार्वती |
य इदं शृणुयान्नित्यं यो वा पठति नित्यशः |
स मुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ||57||

इति श्रीवराह कवचं संपूर्णं |